णे नेति ज्ञापनार्थं। तेन वदः सुपीत्युपसर्गे नेति भाष्ये। गदमदेत्यत्रानुपसर्ग इत्यस्यास्वरितत्वेमे
वमध्येऽस्सं [illegible] वधात्। अत एव प्रगद्यमि [illegible] सादिसिद्धिः। पेचेश्वातश्चोपसर्ग इति कइति राम:
दिक्। भजो ण्विः। सुप्युपसर्गे पीति च वर्त्त [illegible] ते। अग्रवाधनाय मिति। सधंचेदं भाष्ये। उ ८२

भाष्ये पाठः। अस्तु। यथासंख्यमत्र। अरुःपर्यायाद्वस्यानर्थकत्वेपि तदुपपदमिति महासंज्ञयात्तस्य ध्रुवं तत्त्वं तु
द्वितीये वयकत्वेकदेशस्य कर्मत्वेनान्यापेक्षया पुंत्वात्। ललाटसाहचर्याच्चेति बोध्यं। प्रियं
वदो। खच्च। अलंभ्यर्थे। क्वचिद्धस्व इत्यादौ खे इत्येव खशो भावनिः। सिद्धा कुलीन इत्यादौ च खो
इत्यनुवृत्त्यानदोष इत्याहुः। मितंगम इति वृत्तौ मतंगम इति पाठः। खच्च डिद्वेति। योगविभागाद
त्र विहायस इत्यस्यासंबंधस्त्वदाह। भुजंग इति। तापेरिति चुरादेर्हि तुमसंपत्स्यादेश्च ग्रहणमि
ति वृत्तिः। अनिसेति। उपपदविधावेवाने तिङ्सूत्रे भाष्योक्तेरिति भावः। वाचंयम। वाक्प्रादेः क
र्मणीत्यर्थः। संकल्पविशेषो व्रतं। भयशब्देनेति। येन विधिरिति सूत्रस्थभाष्यप्रामाण्यान्चेदं रूपं
विशेष्यमादाय तदन्तविधिरत्रेति बोध्यं। क्षेमंकर इति। क्षेमंकरी स्त्रत्र गौरादित्वान्ङीष्। आशितंभुव्य
शभोजन इत्यतो एतत्प्रयोज्यकर्म णिक्तः। उत्तरसूत्रात्संज्ञायामित्यनुवर्त्यते तेनासंज्ञायां न। अ
त एव धौ बुभुक्षगत्यादिनाभावकर्माधिकरणेषु युक्तस्तदंतो नव्यन्ते सोपसर्गस्य प्राप्त्यर्थं स्यवा
भेद वः सकर्मकत्वेपि कर्मणीति न संबध्यते। तस्या प्रसिद्धत्वात् व्याख्यानाच्च। तदाह। आशितोभव
तीति। अन्यत्रापीति। अनेनैव सर्वत्र सिद्धौ सर्वत्रेत्यादि प्रपंचार्थं। वस्तुतः सप्तम्यां जनेरिति प्रक
रणस्थेनान्येष्वपि दृश्यत इत्यनेन न सिद्धे इदमपि प्रपंचार्थमेव। तत्रापि ग्रहस्य सर्वोपाधिव्यभि
चारार्थत्वादिति बोध्यं। दाराविति। शब्दापेक्षया पुंस्त्वं। अत्यग्रहणं स्पष्टार्थं। कुमारशीर्ष। अयं
णिनिर्विषयद्वितीयानयोरेव नाभूते। भूत इत्यधिकारे कर्मणि हन इत्यस्य पाठो नायमे

ल०श०श्रो तिभाष्ये तदाह । स च स्वादीति । अन्यस्यामः प्रत्ययस्यातिदेशयोग्यकार्याभावात्स्या घमेवण्ण्हुतइतिभावः । श्रि
३० यमन्यमिति । परे तु । स्वमोरिति लुगत्र न बाध्यसामान्यचिंतया सुपो धातुलिति लुग्वत्प्रसापेक्षाद्विधान
८२ सामर्थ्येन बाधात् । किं चास्यामो बहिरंगतयासिद्धत्वादन्तः सुपो धातुलिति लुक् । उत्तरपदाधिकार एवा
नेन लुक्तिस्तु भाष्ये । तिप्रत्युक्तिक्रमेणापूर्वपदिज्ञाइतिस्पष्टं हि दं । परंतपइत्यस्यान्त्रिपाद्या बहिरंगपरि
भाषाया अप्रवृत्तावनुसाधुत्वेन फलाभाविनमानाभावेन चोत्तरपदाधिकारे तद्भवृत्तेः सत्वात् । तस्मा भाष्ये सि
त्त्रियंमन्य इत्येवरूपं भाष्यसम्मतं । अत एवोपक्रमे श्रियंमन्यइति भवितव्यमिति भाष्यस्थात् श्रियमन्य द्धांति
४३ मितिप्रयोगात् । ह्रस्वस्य मुममोरभावस्य च कल्पनमनुचितमित्याहुः । अयमम्प्रत्ययत्वादेव परः । मु नोक्तम
मासिद्धे ऽजादिप्रत्ययनिबंधने यङादिसिद्ध्यर्थमिदं । सोमेने ति । सोमेनलत्ताविशेषेणयागं कृत वंच हू
वानित्यर्थः । अ ग्निष्टोमेति । अग्निष्टोमसंस्याकयागेनाफ़ वं भावितवानित्यर्थः । यजेश्चसाण दपदस्तु
करणके व्यापारे वृत्तिः तत्र व्यापाररूपभावनायाभाव्याकांक्षायां धात्वर्थयागस्य करणत्वेनोपस्थि क्तात्
तेः पुरुषार्थत्वाभावाच्च साक्षात्सुखसाधनमफ़ वं भाव्यत्वेनान्वेति । यागस्य करणत्वं च भाव श्रिमन्य
नाभाव्यभावकत्वमेवास वत्र करणनामधेयमेव करणत्वं । संस्था वचनस्यापि ज्योतिष्टोमशब्दस्य मित्येव
च तिलद्वाणयायागसामानाधिकरण्याकारणत्वं । स्वर्गादेः कर्मत्वमपि भाव्यत्वरूपमेव । न तु फल भवितव्य
मं १५ अप्यत्वरूपं । अत एव दृष्टानां कर्म तपदेनैवोक्तेत्वइत्याहुः । कर्मणि । कर्मण्युपपदे भूतार्था रामः
च्छते णिनिरित्यर्थः । इदं शब्दशक्तिस्वभावात्कुत्सायामेवानेन चोरं हतवानित्यादौ नेति वृत्तिः । ८२
चतुर्विधइति । ब्रह्मादिषूपपदेषु भूते वर्तमानाद्धातोः क्विपतिसूत्रार्थः । तत्रा विशेषाच्चतुर्व मिति दे

पपदस्येति। वुधेच्चेतिसूत्रेंतुआममांसभक्षकेक्रव्यादइत्येतद्व्याव्हत्यर्थमितिभावः। अन्येतुगं गा
धरादिवत्सच्चाद्यच्चिसर्वेणां दीर्घेणसाधुरित्याहुः। वस्तुतोयमसाधुरेवेतिपरे। निव्हत्तमिति। आ
तोमनिन्इत्यत्रविजुपेइत्यतोनुवर्त्तमानमित्यर्थः। दृशिग्रहणादुपपदस्यापिव्यभिचारः। वनिपः
शर्वरीत्युदाहरणं। राहरेडिति। शबुरिषहिंसायां। क्विप्च। अत्रापिदृशिग्रहणमनुवर्त्तते। क्विं च्चान्येभ्योपिदृ
श्यतेइतिताच्छीलिकप्रकरणेभाष्योक्तेस्तदाह। दृश्यतेइति। अन्येभ्योपिदृ। अत्रविचोपिसंबंधइतियूआख्या
वितिसूत्रेभाष्येस्पष्टं। इस्मन्। स्वचिहस्वइतिछादेर्घ इत्यतोछादेरितिचानुवर्त्तते। लोपश्चेति। अंत्यस्येति
शेषः। ध्रास्थाइति। अंतर्भावितण्यर्थत्वेशामित्यस्यकर्मत्वं। अन्यथानतत्वं। प्रत्ययस्तूभयथापिसुपीत्यस्यैवसंबं
धात्। अत्रविच्चवाक्विविसत्रभिक्षिपाभ्यावेनसाहृश्या द्विजेवोच्यते। अतएववनेत्वं। अचंवाध्यितुमिति। अन्य
थाधातुग्रहणसामर्थ्येनकृञोहेत्वादिषुटवाधवत्शंपूर्वकस्थाम्थातोःकृक्रियावण्चवाधेतेत्यर्थः। उपसर्ग
भिन्नएवेति। सुपीतिवर्त्तमानेपुनःसुप्ग्रहणेनोपसर्गे पीत्यस्यनिव्हत्तेरितिभावः। भोव्येत्ति। अतएवोपस
र्गेहूतीतिसूत्रेसुवापीतिभाष्यप्रयोगोनुणादिनोविसारिणइतिसौत्रप्रयोगश्चसंगच्छते। साधुकारिणी
ति। करोतिरत्रसार्वधात्वर्थानुवादकस्तदाह। साधुदायीति। कर्त्तर्युपु। कर्त्तभूतोपमानवाचकेउपपदेइ
त्यर्थः। व्रते। सुप्युपपदेव्रतेगम्यमानेणिनिरित्यर्थः। स्थंडिलेति। स्थंडिलएवशेतेइत्येवंव्रतमत्रगम्यते। स्थं
डिलेशेतेएवेतितुन। तस्यव्रतत्वाप्रसिद्धेः। वहुल। वहुलग्रहणाद्दाभीदोपापपदयोरभावेपिव्रतइतिसू
त्रेभाष्यवोधितवृत्तार्थेस्यायीत्यादौणिनिः। आ समानेख। आत्ममानइतिकिं। दर्शनीयमानी
देवदत्तस्येतिसूत्रे ऽमितितत्रेणमपदद्वयविदेषाः। एकं विधेयसमर्पकमपरंप्रत्ययविशेषणमि

इत्यस्यादयो दिवाघंतगणभूताः । शीतंजलमिति । अनेनसूत्रेस्पर्शनिशब्देनगुणएवप्रसिद्धत्वाद्व्या
ख्यानाद्ध्वगृह्यतेनतुरोगइतिध्वनितं । अतएवप्रत्ते भ्रे तिसार्थकं । तद्विषयेनत्वंच । विभाषाभ्य । पूर्वग्रह
णमभिधीनइत्यर्थमितिवृत्तिः । व्यवस्थितेति । एतदपिवृत्तौस्पष्टंभाष्येलेतन्नदृश्यते । वृत्तावपियदि
नेष्यतेततोव्यवस्थितविभाषेतिवदतैवामनभिधानंसूचितं । नत्वपादानेइतिचेन्नदीयमपादानं
नप्रयु ज्यतेइत्यर्थः वक्तव्यमितिलजेः प्रकाशापसरूपं । तदर्थादंचेत्तुनिष्ठानभिधानमितिवा
ध्यं । परस्पवि भाषा । आर्द्धधातुकस्येत्यनुवर्त्तते इड्वि हितइत्यध्याहारः । अत्रैकाचइतिवर्त्त
तेतेनदरिद्रितइत्यत्रन । निष्ठादेशइति । स्वरप्रत्ययोरुदाहरणं । दीवः । दीविकः । अत्रनिष्ठावत्त्वज
नादितिनिष्ठातस्यद्व्यचोविधीयमानमाद्युदात्तत्वंनोध्यचइतिठन्चनप्राप्नोति । इदंचेदसहितस्यनि
ष्ठातस्यलोपोनिपात्यतेइतिपक्षे । यदातुतकारमात्रस्यलोपोनिपात्यतेतदानेदंप्रयोजनमितिव्यर्थं
तयोर्ग्रहणं । इड्विधिग्रहणंतुदीवेडश्रृयेत्वेड्व्यावृत्तये । परिस्कांदः प्र । अत्रैवनिपातान्निष्ठायां
तलोपइतिमतेस्यात्रोपन्यासः । अन्वप्रत्ययांते बत्वाभावनिपातनमिदमन्ये । एतन्मतद्वयमपिवृत्तौ
स्पष्टं । व्रातप्रेदिति । इदंवृत्तिरीत्या एतन्मते निर्वाणोदीपोवातेनेतिप्रयोगोवातस्यकरणत्वेवोध्यः । भाष्ये
तुअवातावाभिधानेइतिवक्तव्यं । निर्वाणोग्निर्वातेनेत्युक्तं । भावेनिर्वाणंवातेनेत्येवेतितदाशयः ।
द्याम्इति । दो ह्रयेइत्यस्मादेन्चवरुसालं स्यः । प्रत्ययपूर्वग्रहणप्रसक्तौतिःइत्यर्थ । मत्वतुन । प्रस्सइ रामः
तुक्तौःअ त्रैसैष्ठ्येइत्युभयोरपिग्रहणमितिवृत्तिः । एतत्सर्वंभाष्येनदृष्टं । लब्धमिति । उत्वंतुच ८५
रफलोरित्यनुवर्त्तमानेतिलेवेवसिद्धं । ततश्चितताक्तौ नियमेनुभयोरपिग्रहणंव्याख्यानात् ।

स्ते २

84

ब्रह्मादिषु भूतार्थादेव हन्तेरिति नियमेनान्यार्थाद्धन्तेरिति प्रत्ययनियमः। ब्रह्मादिषु भूतार्थाद्धन्तेरेवेति ब्रह्मादीनां चा
प्येवकारो विनिगमनाविरहात्। तत्र ब्रह्मादिष्वेव भूतार्थाद्धन्तेरिति नियमे हन्तेरुपपदांतरसंबंध लं तरस
निवृत्तिफलो धातुनियमः। ब्रह्मादिषु भूतार्थाद्धन्तेः क्विबेवेति कालनियम इति भावः। भाष्यमिति। तथा च वंथनिवृ
भाष्यं। उभयनियमोयं। ब्रह्मादिष्वेवेति। क्विबेवेति च युक्तं चेत् तत् अनुपस्थितोपपदप्रत्यययो रूप रोधात्तिफलो
पेद्वयाप्रकरणलक्षणजघन्यप्रमाणोपस्थितधातुकालयोरेवोपरोधो न्याय्यः। एवं च तद्विरोधाद्धतिर धातुनि
युक्तेतिभावः। काशिकेति। धातुनियमस्त्विह नेष्यत इति तद्भावः। अत्रापि द्विविध एव नियमः। सुकर्मादि यमः २
नदे ष्वेवक्वनिप् एवेति च। एवं सोमे सुञ इत्यादावपि। कुत्सित इति। वार्तिकमिदं। यत्कर्म क्रियया संबध्यमानं
कर्तुः कुत्सामावहति तत्रेत्यर्थः। सोमादयश्च विक्रीयमाणाः शास्त्रनिषिद्धत्वात्तदावहाः। तेनेह न। धान्य
विक्रायः। निष्ठेति। असत्त्ववचनत्वेनेहानन्वयादुत्तरत्रानुपयोगाच्च। सहयुध्वेति। तेन सह
युद्धवानित्यर्थः। सर्वोपाधीति। भाष्ये त्वन्येभ्योपि दृश्यत इति वक्तव्यं परिवेलुक्तं। तात्त्व। यद्यपि
प्रयोगेनुबंधा न श्रूयंते तथापि तदुपलक्षितकारकादिदर्शनेन तत्रानुबंधस्मृतौ निष्ठात्वप्रयुक्त
कार्यसिद्धिः। इत्संज्ञककारवानित्याकारान्न स्मृतिः। अत एव ल्वो त इत्यादौ न तत्त्वप्रयुक्तकार्यं। प्र
भिन्नेत्यादौ एकत्वावगमात्कृतमेतदिति निर्णयान्न दोषः। दीपो दी। यद्यपि निर्देशादेव दीर्घग्र
यकवृन्दा हणं। स्पष्टं चेदं भाष्ये। अत एव दीर्घविधावपि दीप इत्येवोक्तं। रदाभ्यां। चो वाक्यभेदार्थस्तदाह। निष्ठा
४ पेक्षयेति। रदाभ्यां किं। चरिता। तद्धि निष्ठासंबंधितकारविशेषणं। छिन्न हर्णं भिन्नव द्या भित्यादौ
परत्वसमाभूदिति स्पष्टं भाष्ये। कार्ति दोलोष्ध्युत्तरं नत्ववारणाय वृद्धेः परस्य नत्वमिति बोध इति व
क्तव्यं। बहिरंगासिद्धत्वं तु त्रैपादिकेतरगे नास्तीति निरूपितं। ओदितश्च। भूस्वासरस निष्ठातस्य न

ल॰ शा॰ शे॰ ७॰ वादिकस्यात्रसूत्रे न ग्रहणं किंतु विमोहनार्थतो दादिकस्यैवेत्यर्थः। लुब्ध इति। घनाकांक्षावानित्यर्थः।
८५ उदाहरणे प्राप्तमोह इत्यर्थः। आदिकर्मणि निष्ठेति। आद्ये क्षुत्रिपाद्याणेत्रुम्। तेष्वपि क्रियाम्भूतत्वा
भावादप्राप्ता निष्ठेति वचनं। आदिम्भूत एवावयवे समूहरूपमारोप्य तस्य समाप्त्याम्भूतत्वं यद्वा
आरोपिते तदेद प्रसारख्यात। तदुक्तं पक्कतं तदभिसमीद्दृपप्रयोगे प्रकृतः कटं प्राकार्षीत्कटमिति। प
दावेणिकात कटो भिसमीह्नितस्तदा प्रकरोति कटमित्येव भवतीति भाष्यं। विभाषाया। आदित्तश्चेति
निषेधे प्राप्ते इदं। सेण्निष्ठेति। अस्यानिटो भावादिदं स्वरूपकथनं। अत्र ऋषिः सर्वो विज्ह्यते।
85 श्वीदितइतीति। ननु नित्यत्वात्संप्रसारणं पूर्वं योः श्रुकः इस्येव निषेधे सिद्धे श्विग्रहणं व्यर्थमिति
चेन्न। श्रुकइत्यत्रोपदेश इत्यनुवृत्तेः। अत एवस्तीत्वे लादिसिद्धिः। श्रूनइति। अत्राल्विधित्वे पिह
लइत्येतत्सामर्थ्यात् पूर्वरूपस्य संप्रसारणत्वं। तत्सामर्थ्याद्दे वचकदतिङ्स्सूत्रस्थभाष्यरीत्येकादेश
स्याचः परस्मिन्निति स्थानिवत्त्वं। वतस्ततइति। अनुदात्तोपदेशेत्यनुनासिकलोपः। आनित्यत्वज्ञापना
द्वेति। इदं भाष्ये न दृश्यते। कृततेरीदित्त्वमनार्षमिति परे। दरिद्रितइति। तन्नियतीतिसनिवेटकत्वात्प्राप्तिः।
यदि मेध्यादिसाधने धात्वर्थे दुब्धादयो निपात्यंते मंथेन तेन सादत आह। समुदायेनेति। अन्यत्र
प्रयोगस्तु साधुष्यात्स्वांतशब्देन वात्यविषयेष्वविदीप्तमनाकुलं मन उच्यत इति कैयटः। ननु धृषे
रादित्वाद्विकल्पे प्राप्ते तदंशे नित्यार्थो विधिः स्यात्। तत्र आभावादिकर्मभ्यामन्यत्र वैयात्याभावे पि
आदितश्चेति निषेध एव स्यादत आह। भावादीति। वैयात्यमविनीतता। हरदत्त इति। अत्रास्त्विवी रामः
जंतुप्रवैयात्यभावादिकर्म [illegible] तोभावेतु इदित्तए ८५

एकानुबंधपरिभाषायाःप्रसार्दत्रेकलासलनिष्पत्ताविसस्यनात्रनिपातनं।इड्भावस्यापिनिपातना
पत्तेः।एतेनपुल्लविकसनइत्यस्यनिष्ठातलोपोनिपात्यतइत्यपास्तं।तत्वेइत्यादिभाष्यविरोधाच्च।नचानु
पसर्गादित्युक्तेःपरिकृशइत्यस्यानुपपत्तिःपरितःकृशःकार्ष्यपनेस्य नपरेः कृशांपसनुपसर्गत्वाद्
तोकृशशब्दःकार्श्यपरइतिस्पष्टंभाष्ये।इष्यतेइति।वार्त्तिकारेरितिशेषः।इटोभावश्रूतेः।निष्ठादेशः
षत्वस्वरप्रत्ययेडिविधिषुसिद्धइतिसिद्धत्ववार्तिकेइड्विधिग्रहणमेतन्निपातनसिद्धार्थानुवाद
इतिभावः।तादौकितीतिनिर्मूलंनिष्फलंच।ताभ्यांपरस्य।तादेःकितएवसंभवइत्याशयोवा।नु
दविदोदमङ्कक्ष्मायाररदाभ्यामित्यतोनइतिवर्तते।द्वियोग्राह्येन्येषांप्राप्तेविभाषेयं।परेणेति।
यदितुपूर्वत्वसाहचर्यमंतरंगमित्युच्यते।तदाख्यानादेवास्यग्रहणंबोध्यं।उत्तरइति।एतेन
श्रोलस्जीत्यादेर्लग्नइत्यत्रणनिषेधेनस्यासिद्धत्वान्नेड्शीतीतिनिषेधेसिद्धेत्रेदिङ्ग्रहणंव
र्थमित्यपास्तं।चस्मनादावितिपरिगणनेनात्रतदप्राप्तेः।ख्यातइति।ख्याइत्यस्यख्शा देशा
त्वतंत्रस्यार्द्धधातुकेप्रयोगाभावाच्चात्रख्याग्रहणंव्यर्थमितिबोध्यं।क्षसौवेट्त्वादिति।एका
चइतिनिषेधाच्चेत्यपिबोध्यं।भित्तमिति।शकलजातिविशिष्टरूढोयं।तेनभित्तशकलयोःपर्यायत्वा
न्नसहप्रयोगः।निष्पन्नस्यशकलस्यान्यस्मिन्विदारणेप्रतिपाद्येभि त्तंभिन्नमितिभवत्येव।किं
चभिन्नंविदीर्णमितिसामान्योपक्रमेभिन्नमितिप्रयोगइतिस्पष्टंभाष्ये।इण्निष्ठायां।इडितिवर्तमा
नेपुनरिड्ग्रहणमिड्ग्रहणंनित्यत्वायनिष्ठायामित्येतत्तुयस्यविभाषेतिनिषेधबाधबाधनार्थं
स्यात्।वसेतिहतु।श्वेतापीति [illegible] तन्नाप्री इसिद्धः।तुल्यार्थेति।गार्ध्यापिदे

ल०शा०शे० उ० च्छे
ष्यं । लोमस्विति । कृन्तविलिखत्यर्थः । इदमजयमित्यत्र भाष्ये स्पष्टं केशानामपि लोमत्वात् । तत्रापि विकल्पः । अन्य
त्र लिति । अर्थभेदेन रूपद्वयमर्थे क्वचिदपि विस्मितप्रतिघातयोर्द्वै … प्रायस्तत्रं । अपचितेश्चायम् अभि
वइङ्भावश्चानिपात्यते । क्तिनि नित्यं चिर्वा च्यः । अपचितिः । प्यायः पी । अत्र भाष्ये आङ्पूर्वादंधू
धसोरेवनेह । आप्यानश्चन्द्रः । तथा आङ्पूर्वादेवांधूधसोः । नेह प्रप्यानम् । धइति । आङ्पूर्वादे
वेति नियमेनोपसर्गान्तरमेव व्यावर्त्त्यं तेन केवलः प्यायतिः । आङ्आङ्ग्रहणेनानियमद्वये विधाना
केवलस्य सर्वत्र पीभावः । पीनोधुः । पीनमूधः । पीनं मुखं । पीनमस्वीकृत्येति । तेन विभाषाग्रहणा
हर्ये ८ नन्वनुवृत्तिरेवात्र लभ्यते । व्यवस्थितत्वात् । सादिम् । लंतु … नुरोधेनोवोध्यं । घतिस्य दोसोमास्थेतिइ
86 षा निर्देशः । उपसर्गात्सुनोतीतिवत् । दीर्घेत्यादि । तत्वंतु स्वविषये परत्वादस्य बाधकमितिभावः । मामाङ्इ
ति । गामादाग्रहणेष्वविशेषादितिभावः । तकारोदात्विति । यस्मिन्विधिरिति न्यायादयमेवार्थो ननु
तांतेदाधातादितीति भावः । स्वशास्त्रकस्त … तच्च … सिद्धत्वबाधापेक्षया यस्मिन्विधिरित्यस्यामाकर
णान्तरपठिताया बाधेन तां तदाधातुग्रहणे तोत्रपदइत्येवार्थ उचितइति तां ते दोषो निष्ठान … धांते
दोषो … स्यांतइत्येतत्भाष्याशयः । दइतिच षष्ठीसप्तम्यर्थे । संनिपातेति । न
च … नलथलयोरसिद्धत्वादस्याप्रवृत्तिरितिवाच्यं । असिद्धत्वापितद्विघातकविधेस्तथावारणा
त९४ स्यकत्वेजंतस्तत्र भाष्ये ध्वनितत्वात् । जग्धमित्यादौ घत्वानापत्त्येदृशे विषये सन्निपातपरिभाषा रामः
पाप्रवृत्तिसत्वाश्रयणमावश्यकमितितु भाष्याशयः । चष्टावादिति । … तरा वच … कृतत्स्तत्र च्छे
स्थं प्रवृत्तमव … मित्यव … इत्युदाहरणपरं भाष्यं चसंग

वन्निपातनमनिदितस्तु कषहितमित्येवेत्युक्तं । कष । कषीति । प्रभीतदर्थस्यैवानुगमादितिभावः । घुषिर ।
शब्देनाभिप्रायप्रकाशनं विशब्दनं तदाह । शब्देनेति । णिलुक् चेति । तेनोपधागुणेन । ग्रथीयमाने
इति । तदर्थे चेत्क्तौ तं वर्तते इत्यर्थः । क्त । तं छंदइति । कर्मणि क्तः । क्तं छंदसइति प्रयोगस्तु केवला
द्धर्तेरकर्मकाद्भावे बोध्यः । तत्र हि यस्य विभाषेति णिनिषेधः । यंता तु भावे क्तो दुर्लभः । नपुंसके भावे
इत्यस्याप्यकर्मकेभ्य एव विधानादिति स्पष्टं भाष्यादौ केवलस्यार्तिः कर्मव्यापारे वर्तते ततोऽकर्मकत्वा
त्कर्त्तरि क्तस्तदाह । स्वयमेवेति । ततो णिच् चेत् पाच्चिनासमानार्थात्कर्मणि तदाह । पक्वमिति । दीरेति ।
तथा च भाष्ये किं निपात्यते अ्रप्यो अभावइति आतिः पच्यमानकर्तृव्यापाररूपे कर्मकर्तृविषयपच्या
र्थे वर्तते कर्मकत्वात् कर्त्तरि क्तः । णिजंतस्तु मुख्यपच्यर्थे ततः कर्मणि क्तः अंतं दीरं देवदत्तेनेति कैयटः ।
दीरहविर्णोरिति वक्तव्ये क्षमाम्भूत् । आणअपिता ... वायवागूरिति श्रेयः पुनर्व्यापारे णिचेयान्व
नालदाणार्थे अपितं दीरं देवदत्तेन पकृदत्तेनेत्येव न तु अंतमिति श्रेयः । अंतमन्यत्र हेतोरितिदत्त
णमिति वार्तिकात् । अंतर्भावितण्यर्थपचेर्घ्यंजि पाकपदेन साप्याभिधानसंभवइति तदाशयः । एतेन
तस्य पाकत्वाभावादेव निपातनाप्राप्त्याइदं वार्त्तिकं व्यर्थमिति कैयटोक्तं परास्तं । दीराज्यहविर्णाष्व
तमित्यमरस्तु प्रमादः । वा दान्त । दान्तशान्तपोर्णि लोपे इडभावो निपात्यतेऽनुनासिकस्येति दीर्घः । द
स्तस्य च छन्नेत्यपि णिलुगिडभावौ द्वयमेव मित एव णिलुगिडभावौ इति कैयटः । छन्न इति मित एव
वन्निपातनमिति स्पष्टं भाष्ये । रुष्यम । संघुषास्वनो ... पर्येडभयत्र विभाषेति नव तिस्रत्रेभा

ष्ठुदात्तप्रयोगस्येष्टत्वेन तदर्थं निपातनमिति साध्यस्यापि वक्तुं शक्यात्। अतएवाशितः कर्त्ते तिनिर्देश
साधुत्वं न विचारितं भगवता दत्तवानित्यर्थे दत्त इत्यादि तु नापाद्यं। विवक्षापाः प्रयोगाधीनत्वादित्यलं।
भुक्तमस्तीति। भुक्तमन्नमित्यर्थः इत्यादीति। अतएव सुवते: स्तु तइत्यत्र वर्त्तमाने क्त इत्यत्र कैयट: जीतः क्तइ
त्यादौ मेङ्कक्चुत्वा वर्त्तमान इति सं वध्यते। चानश्च न तिङो: सर्वकालतायाम् तइति म्ब तइतिसूत्रे भाष्येउ
क्तो: जीर्ण इति जीर्णा जीर्णो जरन्न पीलमर: तसेति। अनंतरस्ये तिन्यायेन लिट: कानज्वेसत्र पू
र्वे लिट एव ग्रहणा द्योगवि भाग उत्तरत्र क्वसो रेवसंबंधार्थ: कानज्वेति ग्रहणंतु पदोतिङ: अ
वणार्थं। वा सरूपन्या यस्त्वादेशेष्वन। अत्र च दंवाग्रहणमेव लिंगमिति ध्वनितं भाष्यकैयटयोरिति
स्पष्टमेव। तेन सदादिभ्योऽत्तसामान्ये लिट: पदोतिङ: मस्त्रवणं शत्रविषये यथा तिङस्तथा वक्ष्यते।
इमौ कानच् क्वसू छांदसौ इति अत्रै वसूत्रे भाष्ये स्पष्टं। विभाषा पूर्वाह्णापराह्णाभ्यामिति सूत्रे पथुषइ
दंयविवद्रूपमिति प्रयुक्तं तेन लोके पि क्वाचित्क्वसो: साधुत्वे तिसूचितं। अ र्ण कात्सूत्रेस्थं भाष्यं लं
जप्रक्तीति ककृसुपरमिति वोध्यं। एकाज्ग्रहणसा मर्थ्यलभ्यमर्थमाह। कृतद्वित्वे ति। द्वित्वोत्तर
भा०११ मभ्यासादिकार्ये भुक्ते चैकाच्चामित्यर्थ:। तद्भिना ने काच्चमाह त्तये। तत्रति द्यामःसत्वान्मंत्रे तथा
प्रयोगाभावाच्च। नचामभावेजागर्ति भावस्यैः। नन्वेकमुदाहरणमिति न्यायात् दरिद्रातेस्तु कृत्ते द्वित्वा
नामित्यर्थाभावेत्र्या ग्रहणस्य भ्रतपूर्व कारां तथ ग्रहणे न दरिद्रा सर्पतया नत द्यावस्येलमिति एकाज् रामः
ग्रहणसामर्थ्ये नक्त तर्हि ह्वित्वानामित्यर्थलाभ इति भाव:। सिद्धांते तस्याप्रतिकग्रहणेनादस्वा
रितात्पे न दरिद्राता मेदस्व ऽतिवोध्यं घसिग्रहणाभावेतु द्वित्वात्परत्वान्निसत्वात्र्वे घसि ८७

च्छते नीत्तमित्युत्तरं वी त्तमित्येव पाठः सूत्रमिति लपाठः। गतिश्चेत्सूत्रभाष्ये सौत्तालेडपसर्गत्वप्रतिषे
धात्। वाक्रोशे। अत्रापि पदर्थइति वर्तते। निनदीभ्यां। निपूर्वस्ना तेः कौशले पैं निष्णातस्यैव प्रचुरप्रयोग
दर्शनादिदमत्रोपन्यस्तं। कपिष्ठलो। गोत्रमिह पारिभाषिकमिति भाष्यस्वरसः। गोत्र प्रत्ययप्रकृतित्वेन
दृष्टोयः कपिष्ठलशब्दइति व्याख्येयं। प्रसाद्रोपन्यासः प्रासं गिकः। एवं विकुशमिइत्यस्यापि। गत्यर्थाक
आदिकर्मणि च्चेतिसूत्रात् क्तः कर्तरि च्चेतिवर्तते। क्तोधिक। स्थैर्यार्थाः ये ण्यकर्मकाः। अत्र वदंति।
गत्यर्थे त्वनेन सकर्मकेभ्योपि भावे क्तः। विशेषविधानात्। अत एव भ्रांतं देष्टा मित्यादि सिद्धं। अत एवाज
र्ये संगतमिति सूत्रे गत्यर्थानां क्त इति संगते कर्तरि क्तस्य इष्टत्वात् कर्तरीदं निपातनं तर्हि कर्मण्यपि दृष्ट
त्वात् कर्मण्यपि स्यात्। जीर्यतिरकर्मकत्वात्तत्र न। एवं तर्हि भावे ततः क्तस्य इष्टत्वात् तत्र प्राप्नोति। त
स्मात्कर्तरि निपातनमिति वक्तव्यमिति भाष्ये उक्तं। अत एवान्यपदार्थे इति सूत्रे मत्वर्थे बहुव्रीहिरिति
वक्तव्यमिह मा भूत् कष्टं श्रितमनेनेति भाष्ये उक्तं। तत्र हि भावे क्तो न कर्तरि कर्मणि वा तथा हि सति कर्तृक
र्मवाचकेनाप्रथमापाइति वार्त्तिकेन तत्र समासो दुर्वारः स्यात्। क्तोधिकरणे चेत्यनेन भक्तण्यर्थे भस्तु
न भावे व्यवहितपाठेन कर्तरि भावकर्मणोरित्यननुवृत्तेः। अत एव पीता ब्राह्मणा इत्यादि सिद्धये कर्म
क्तोतादर्थ्ये प्राप्नुजं ततोश्रित्ता भाष्यके यद्वयोः। अत एवात्र सूत्रे चापपाठ प्राप्तमित्येव व्याख्यातं। गत्यर्थे
ति सूत्रे विवक्षितकर्मणामपि ग्रहणं। न चाशितः कर्ते सूत्रस्य भाष्यविरोधः। तत्र हि आङ्पूर्वादशः
कर्मकत्वात्कर्तरि प्राप्तः क्तो निपात्यत इत्युक्तं। अन्यथा मातुः स्मर्यते इतिवद् विवक्षिते तु कर्मत्वे
नाकर्तायां सूत्रे ऐ [illegible] निपातनं [illegible] स्यादिति [illegible]। तथा भाष्यस्याशितं ओ दनं देवद इत्या

त॰बो॰ उ॰ नाधिकरणे निसार्थं। शायानामिति। शायनं भुज्यर्थपरि चायकं तदुपलक्षितभुज्यर्थेन च यवनाः
परित्याज्यंत इत्यन्यत्। अर्जनं वाससः फलं। हरिदर्शनं धानं। इहलं दागला दिद्योत्यं। शत्राद्यर्थस्तु
८८ कर्त्रा द्विरेव क्रियायाङ्गतिकि। यकंपते सोऽश्वत्थ इत्यादौ माभूदिति। वेत्तेरिति। सत्ताविचारार्थयोरात्मनेपदि
त्वान्नयोः शतुरसंभवः। लाभार्थस्याविकरणेन मवधानमिति भावः। तौ सत्। अनुवृत्त्यैव सिद्धे तौ ग्रहणं
शत्वशानजूमात्रग्रहणार्थं। तेन द्विषन्द्वेदपमाण इत्यादावपि पूरणगुणेति निषेधः। कचिदिति। क
दाचिदित्यपि बोध्यं। तेन तिङा सिद्धः। लटः सद्वेत्यस्यापि भविष्यदधिकारविहितलृटः शेषे वेति लृटो
११ वृत्तिरित्यनवक्लृप्तमर्षे सत्रभाष्ये स्पष्टं। अकछिणीति। अनायसेन क्रियानिर्वर्तक इत्यर्थः। द्वि
षोऽमित्रे। अमित्रे किं। द्वेष्टि पतिं भार्या नाभिनंदतीत्यर्थः। सर्वे यजमाना एव मुच्यंत इति शेषः। आ
के। भ्राजभासेति क्विप्माइत्यर्थः। ताच्छीलिकाः। आयेणसोपसर्गे भ्रानेसाक्वै तिसूत्रे भाष्ये स्पष्टं। उपदेशं
ताच्छील फलनिरपेक्षप्रवृत्तिः तद्धर्मः स्वधर्मो यस्मिमिति यः प्रवर्तते साधुकरोतीति विना पित्राल्पर्थस्य १०
साधुकर्ता। तृन् कर्तेति। नलोकेति षष्ठीनिषेधः तद्धर्मे मुंडयितारः श्राविष्टा यनाभवंतिव धूम्र
टा साधुकारि णिकर्तृ खेढमिति। भुवश्च। योगविभाग उत्तरार्थः इदं लोकसाधारणमिति। ग्राव्यस्तु भ
गेतिसूत्रस्थभाष्यस्वरसः। तत्र हि अन्वाविसनुवर्त्यभिवितेत्यत्र कर्तरि भुव इति रिक्षुच्छुकञ्जौने
लुक्ताताच्छीलिकइक्षुचुकस्मान्न भवतीत्याशंक्य रूढिशब्दप्रकारास्ताच्छीलिका न च रूढिशब्दा रामः
गतिभिर्विशेष्यंत इत्युक्तं नैतदिति। छांदसत्वमनुक्तं संपादकत्वं चेत्यर्थः। प्रामिनीतरेति। संज्ञापूर ८८

ण्यामग्रेति निषेधात द्रो भुवत्वनतिबोध्य लग्रहणमिति। सुबोर नाकाविसत्रभाष्ये स्फुटमेतत्।

भसीरितिलोपे द्वित्वनिमित्ताज् । निमित्तत्वाभावेन द्विर्वचनेचीत्यस्याप्राप्त्या नन्वकत्वेन द्वित्वं नस्यात् ।
तत्त्वेलिट्लोपयोरपि नित्यत्वेन परत्वादिष्टि ततो हल्ग्रहणमनर्थकमन्यत्रापि भावादित्युक्तेर्लो
पे द्विर्वचनेचीति सिद्धमिष्टं । नान्येषामिति । क्रादिनियमात्प्राप्तस्यायं नियम इति भावः । नन्वय
यिवानित्यादौ सन्निपातपरिभाषया आतो लोपो नस्यादिति वाच्यं । तस्या अनित्यत्वात् । लिटचेति
व्याख्यानाद्वाग्रहणमेतत् । विधेयलिटैव संबध्यते तेन पद्धो लुङादिः छंदसीत्यस्यानित्यत्वे वासिद्धे भा
षाग्रहणं सर्वत्र प्रवृत्त्यर्थं । तेनाद्यतनेतङः परोक्षे लिङिलेत्तद्विषये प्रसप्रवृत्तिरस्य लिटो वै कल्पि
कत्वात्तदेतयोः प्रवृत्तौ तिङां श्रवणमिति दिक् । अम्नातेरिति । अत एवनन्दुटः साहचर्यादिति ।
लुग्विकरणपरिभाषासहकृतादित्यर्थः । एतेन हुनित्साहचर्याद्वेत्तेरपि ग्रहणंस्यादिपास्तं पास्तं । इष्ठे
अतिवार्त्तिकं । लटःश्रा । अनंतरस्येति न्यायेनेतौ वर्त्तमाने लडिति विहितस्यैव वेति वर्त्तमानसामीप्यइ
त्यादौ भाष्ये स्पष्टं । पच्चमानमिति । अत्रातो ङितन्नमुक्ङ्यपवादत्वात् । अतइत्तितपरत्वान्नेति तु चिंत्यं ।
यद्गणभाइत्येवतत्क्व्यस्यतपरत्वेनाभावत्तेः । अत एवाद्युपदेशात्तरत्वप्रयुक्तस्वरसिद्धिरिति दिक् । क
चिदिति । कदाचिदित्यपिबोध्यं । तेन पचति ब्राह्मण इत्यादिसिद्धिः । वासरूपन्यायस्तु नेतिस्पष्टमे
व । भाष्ये तु लटः शतृशानचौ । विभाषेति वर्त्तते । ततो प्रथमासमानाधिकरणे नित्यार्थ मिदमित्युक्तं ।
तेन यत्त्वप्रथमासमानाधिकरणे विकल्पबाधकं सदादिभावहुलं इङ्धात्तोर्वेति वार्त्तिककार
णेक्तं । तन्न । कार्यं योगविभागेन सिद्धेरिति वाच्यं । संबोधने च । इदमुत्तरसूत्रेच प्रथमासमा

ल०श०शे०
उ०
९८

दिति। च्युतिस्वाप्योरितिसंप्रसारणं। जगदिति। गमः क्वावितिमलोपेतुक्। दीर्यतीति। दीर्यतेर्वादृदितिभाष्या
द्विवाक्षोवप्ययमिति भावः। भुवः इद्संज्ञांतरयोः क्विवेवेतिनियमार्थे विपरीतनियमस्तुनविधेयसं
कोचापत्तेः। मितद्रुरिति। क्विपितुक्स्याम्मितद्रुवइ सत्रोवडःचसात्। छेदोधान्यश्रोति। प्रयोगे छुद
योरर्थनिर्देशाद्वितिभावः। अत्रकर्मणीतिनोपपदंव्याख्यानात्। दाम्नी। दम्नोतिशपानिर्देशोदंश
संज्ञेतिनलोपः। दंष्ट्रायामजादित्वाट्टाप्। नप्त्री। नहोधः। विलान्ङीप्। करणइतिनोपपदं। व्याख्या
नात्। कर्तरीत्यपस्यासत्वमभिप्रेत्याह। अभोकरणइति। एवमन्वयेद्वंद्वसाधुत्वापत्त्योभय
त्रोभयान्वयइतिकर्तरिक्वदितिसूत्रस्थभाष्यस्वरसः। पवित्रमिति। याथमान्यादिसूक्तमित्यर्थः।
अथोणादयः॥ प्रायेणउणादिप्रत्ययांतारूढिशब्दाअवयवार्थ अन्यार्थसमप्यवयवार्थमाश्रित्य
व्युत्पाद्यंते। तत्रापिप्रायःकर्तरि। बाहुलकादन्यत्रापीतिबोध्यं। तत्रापिप्रायोवर्त्तमानकालएवेतिभूतसूत्रे
भाष्ये। तत्रहिनत्याहनएह चेतुणादिसूत्रविहिताप्रत्ययांतोनेहसशब्दोवर्त्तमानकालएवान्य
त्राहंतेत्युक्तं। एवुल्तृच्चौवर्त्तमानकालएवसाधुतायां। एवुल्तृचावितिसूत्रेभाष्येउक्तत्वेनेदंभाष्य
मेकदेश्युक्तिः। अत्रवदंति। कृवापेसादिसूत्राणिसर्वनामधातुजमितिनैरुक्तमतानुसारिशाकटायनादि
प्रणीतप्रतीकमुपादायोणादयइत्येवोणादीनांशास्त्रांतरपठितानांसाधुत्वमनुज्ञायमस्त्वितिभावइति
केयटेनोक्तं। नह्येवंपाणिनीयत्वेशास्त्रांतरशब्दप्रयोगोयुज्यते। अतएवायामेगुरिस्कृतावितिउणा रामः
दिसूत्रेबोधितसाधुत्वानामभ्युपगमेलोमशशब्दादीनांसाधुत्वापरसमत्वार्थं कपोरोलइतिसूत्रे ९८

८९

घिनुण कर्मके भ्यणवेति भाष्यं। खिलसंपा क्यादौ कुलार्थं। रागीति। अत्र रजेति निपातनान्नलोपइत्सनिदि
तामिति सूत्रे भाष्ये स्पष्टं। पूर्वे णेति। सकर्मकपदेस्तु पुंचोनभिधानमिति भावः। ननु वासरूपन्यायेन
युजपीत्यत आह। तेनेति। त्राप्यत इति शेषः। कूचि तेति। तेन शयालुरिति। लुङाप्रसंगे प्रयोजनाभावा
त्सत्यभावे शप्यतो दीर्घेणास्य हयालु प्रभृतौ सिद्धे निपातनादे श्रद्धत्स्यधाशब्देन समासे अजस्र
र्थितं द्राव द्विशिक्षात्प्रत्यये धातोर्विधानाभावात्सार्वधातुकत्वाभावात् शप्अलोपस्य चाभावे श्रद्धा
लौ च सिद्धे आलुच् विधानमन्यतोपि विधानार्थं तेनेदं सिद्धमिति स्पष्टं भाष्ये। घसमरे घसिः प्रकृत्यं
तर। भंगुरः कर्मकर्त्तरि। वधिलाकुलं। अजस्रमिति। निपातनात् धातुना समासे कृते रः। आदितिदकारः
तेन ऋग्रहणे न दीर्घो तस्यापि ग्रहणं हृग् इत्यादेः। स्वरूपावाधेनाति देशप्रवृत्ते स्त्विवादयोन। असं
योगादित्येव किले सिद्धे पुनः किलंजथुरित्ततुरिरित्यादौ ऋच्छत्यृतामिति गुणनिषेधार्थं। कासिके
ति। भाष्ये तु नेत्यर्थः। ईश्वर इति। ईश्वरीति तु युयोगे। क्विप् ड इति। प्रत्यत्रिविकलं। पूरिति। राल्लोप इति वलोपः।
ऊनेति। वासरूपविधिस्तु ताच्छीलिके तु निषिद्ध इति भावः। दीर्घोऽसंप्रसारणे वे। असंप्रसारणं चे
ति दीर्घवचन सामर्थ्यलब्धार्थानुवादः। तथाहि। प्रत्ययसंनियोगे न विधानादंतरंगतया दीर्घे सेक
स्तयोरु तेसंप्रसारणे पूर्वत्वे चक्रतेलक्ष्ये लक्षणस्येति पुनर्दीर्घाप्रवृत्तेव चिप्रच्छ्योस्तद्विधानमनर्थकं स्यात्।
अन्यथा क्विपः सौत्रेण वसिद्धे तत्र ग्रहणं वर्णमेव स्यादि तिस्पष्टं भाष्ये। एतच्च दाप्यमाणादेव लक्ष्ये
लक्षणस्येति न्याये विकारकृत लक्ष्य भेदानाश्रयणमित्याहुः। वार्तिके इति। अन्येभ्योपि दृश्यत इति
सूत्रमप्येवमेवेति बोध्यं। [illegible] निरूपयिष्यामः। दिष्टु

ल०श०शे० उ० ८० उणाद्यंतायेशास्त्रांतरेव्युत्पादिताः शब्दास्तत्र बहुलमिति वक्तव्यं वर्त्तमानाधिकारे चतेवक्तव्याः भूतेपीति च
वक्तव्यमिति सूत्रार्थश्च सूचितः। स्वशास्त्रे तेषां साधुत्वबोधनं चैतावतैव कृतं। पाणिनेस्तु तेषु व्युत्पत्तिप
दार्थेवाभिमतः। तदुक्तमापन्नेयीति सूत्रे भाष्ये प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धमिति। तत्र पाणि
नेरव्युत्पन्नातसाधुन्ना न्युणादयः प्रातिपदिकानीति मतमिति सूचितं। सर्पिरादिग्रजुषेत्यादौ षत्वं बहुलग्रह
णादेव। अतएवादेशप्रत्यययोरिति सूत्रे कृसरे वसंतसमित्यादौ व्याकरणांतरे सरकुसादिषु। सर्पिरा
षत्वमाशंक्य सिद्धांतितो णादयो व्युत्पन्नानीत्युक्तं ततः शंकितापेषां सर्पिरित्यादौ रुत्वानुरोधेन सांतानां दीनां
१० सर्पिषेत्यादौ षत्वं दृश्यते तादृशं व्युत्पत्तिविषयो दाहरणे व्युत्पत्तिपदार्थं यत्नं न शक्यं कर्त्तुं सर्पिषेत्या ६
दौ षत्वानापत्तेरिति शंकितेसिद्धांतितो तं। एवं तर्हि बहुलवचनात्सिद्धं। बहुलं प्रत्ययसंज्ञा भवती
त्युक्तं। बहुलमित्युक्तेरव्युत्पन्नेपि प्रत्ययसंज्ञानिमित्तं कार्यं भवति व्युत्पन्ने च कार्यविशेषे प्रत्ययत्वं कार्यवि
शेषेत दभाव इति वर्सं मित्यादावंगत्वप्रयुक्तगुणस्य मत्वाभावस्य च सिद्धिरिति तदर्थः। एवं चायामं तेति
सूत्रेंतादीनां ग्रहणं न्यक्वादीनां चेति सूत्रे उणादिव्युत्पन्न न्यंक्वादिग्रहणं च व्याकरणांतरस्थाप्र
त्ययानुवादेन तदनुमतिपरं। अनेहा वर्त्तमानकाल एवेति भूतइति सूत्रे भाष्ये व्युत्पत्तिवादिव्याकरणांत
रलीला। अव्युत्पन्नत्ववादि पाणिनिमते तु नतदिति बोध्यं। एवं च तच्चअकाराभावे मात्रादिशब्दे दीर्घापा
दानादि परं एवुल् तृचादिति सूत्रस्थभाष्यमपि तद्रीत्यैव। अतएव मातयती त्यादावियष्ठवाद्यावानुरिष्ठे राम:
मेयस्त्विति लोपो न उणा दीनामव्युत्पन्नत्वादिति रन्त इति सूत्रे कैयटः। अतएव वाप्या ८०
मंतेति सूत्रे भा [illegible] व्युत्पन्नत्व [illegible] न्येन नोद्दिष्ठो गुणवचनत्व

वचनमारब्धं वार्त्तिककृता । बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषां । कार्यसशेषविधेश्च तत्
दुक्तं नैगमरूढिभवं हि सुसाधु इति बहुलग्रहणप्रयोजनमुक्तं । शास्त्रांतरे तेभ्यः प्रकृतिभ्य उणाद
यो दृश्यंते प्रत्ययास्ते प्रायेण समुच्चितान सर्वे तथा कार्याण्यपि सशेषाणि कृतानि श्रुतौ बाहुलकमु
क्तं । ननु पाठवदुक्तमेव प्रकृतिप्रत्ययकार्यमस्तु किं बहुलग्रहणेनेत्यत उक्तं नैगमेत्यादि कानां रूढानां वैदि
संज्ञाशब्दानां च सर्वेषां प्रातिस्विकरूपेण साधुत्वबोधनसामर्थ्यचला शास्त्रांतरे प्रायसमुच्चयनादि
कृतं तेषां सर्वेषां साधुत्वाभ्यनुज्ञानाय चानेनाचार्येण बहुलग्रहणं कृतं । तेनात्र व्याकरणे सर्वेषां सं
ग्रहादसंदिग्धं साधुत्वं बोधितं । पाणिनिशास्त्रबोधितानामिदानीं साधुत्वात् । ननु केते वैयाकरणा
ये नैगमरूढिभवानां प्रकृतिप्रत्ययविभागेन व्युत्पादनं कृतं । तत्रोक्तं वार्त्तिककृता । नाम च धातुजमाह ।
निरुक्ते व्याकरणे शकटस्य च तोकमिति । निरुक्ते व्याकरणे शाकटायनश्च सर्वं नामधातुजमाहेति ते व्यु
त्पन्नत्ववादिनः । एवं च पाणिनिनं तद्व्युत्पन्नत्ववादीति स्पष्टमेवोक्तं । ननु यत्रावयवार्थानुगमो ना
स्ति तत्र कथं व्युत्पादनं शक्यमत उक्तं । यन्न विशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यमिति । अवयवा
र्थज्ञानपूर्वकं न यत्र समुदायार्थप्रतीतिः शास्त्रज्ञानपूर्वकमित्यर्थः । उक्तप्रत्ययं सादृश्यं दृष्ट्वा तदित
रो भागः प्रकृतित्वेन कल्प्यः । उक्तप्रकृतिसादृश्यं दृष्ट्वा तदितरः प्रत्ययत्वेन कल्प्यः नैवं सर्वत्रोहः कार्यः किंतु
साधुत्वेनाभिमतासु संज्ञास्वेवेत्युक्तं । संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे । कार्याद्विद्यादनुबंधमे
तच्छास्त्रमुणादिष्विति । एतदुपलक्षणं । कार्याणामपि । तदुक्तं कार्यशेषविधेश्च तदिति ग्र
नेन भाष्यवार्त्तिककृ [illegible] पकमिति संक्षेपमवोचत् ।

ल०श०शे० उ० सितिवोध्यं।अन्यथा वहुलग्रहणात् क्वचिदन्यदेवेत्यर्थकाकार्यंत्तिरवदेवामपिकार्याणां सिद्धौतवा
८१ प्येतद्वैयर्थ्यस्यच्छमेव।एतेनच्छि ध्वचीत्युणादिसूत्रेण सिद्धेच्छि पूर्वचीत्यादिवार्त्तिकं त च्छीत्वादौ
त्वनावाधामाभूदित्यर्थं मित्यपास्तं तेषां पाणिनीयत्वाभावात्।अतएव वाजेवौ तिसूत्रे वालिटीसत्तो
वाग्रहणमनुवर्त्त्यव्यवस्थितविभाषामुक्त्वा न तर्ही दानींवा [illegible] यावितिवक्तव्यंच।किंप्रयोजनंनेयं वि
भाषाकिंतर्ह्यादेशो विधीयते वाइत्ययमादेशो भवति।अजेयौ परतः वायुरितिभाष्योक्तसंगच्छते।
अन्यथा कवायाजीत्युणादिसूत्रेण वायोःसिध्यात स्याकर्तव्यतामेव वदेत्।युअनिनेवानुमेयोपसं
ख्याने अनुनासिकपर्णत्वाभावात्।अनोननलके यटोक्तरीत्याजिमनीतिवाहुलकात् युच्चिअसुरि
तिरूपवारणार्थं तत्र न्यायतस्तदभावेन तद्रूपापत्त्याभावात्।ममतुतेषाम पाणिनीयत्वात् पाणिनि
वि० ८ शास्त्रे तदारंभोयुक्तः यत्तुप्रतिषेधसूत्रे येन विधिरितिसूत्रे च वहिरंगपरिभाषया सोनःस्यानि
त्युदाहृततदव्याकरणांतररीत्यैव।तत्र हि वाहुलकादौणादिको न प्रसंगः तया विप्रतिषेधसूत्रे
तरंगपरिभाषाया अंतरंगत्वात् पूर्णादेशे वैयाकरण इत्यादौ इकारोकारगुणवृद्धिप्रसंगे इयुवा
वितिव्याकरणांतरलक्षणविहितयोरियुवोरप्राप्तिरूपो दोषःशंकितः प्रेयमेधइत्यत्र तयोर्विरणापा
चीत्यस्यावश्यकत्वेनानवकाशत्वेन न समाधानमुक्तं।यदपि कर्मवत्सूत्रे किमिदंतयइतितयेर राम:
यमोणादिकोस्काराभावसाधनइत्युक्तं तदपि परीत्यायोगप्रदर्शनेन स्वमते तदर्थं तच्छब्दस्यस्त्ववोधना
येति न तद्विरोधः।एवमन्यदप्येवंजातीयकं मारव्येयमितिसुधियो विभावयंतु इति।अनुवंधहृद्येति।स्व ८१
रार्थं मित्यमेदो स्वितिभावः।विलुइतिवाद्वादिप्रातिपदिकेन वासिद्धं इदव्यर्थं।तवेतिरो त्रइति।

न्त्रोर्गुणो वक्तव्यः स्तनयित्नुर्गदयित्नुः अस्तु तर्हि इत्नुः प्रत्ययांतरं कर्त्तव्यम् अयादेशेन्चोपसंख्यानमुभयं
क्रियते न्यास एवेति अस्यार्थः। अपामेत इति सूत्रेणापूर्वादेशविधायकं किंत्वेन्चोपवायावइत्येत
द्विहितायनुवादकत्वलाघवात्। तत्फलं तु णिलोपाभावबोधनं। तत्र किमंतादिवत् व्याकरणांतरविहि
तः। कृत्नुरेवकृतेऽनागमोत्र सूत्रे निर्दिष्टः। अयंततोन्यइत्नुः प्रत्ययांतरमिति प्रश्नः। तस्येडादित्वा
त् णिलोपाभावे किलाङ्गुणाभावेनास्यानुवादत्वासंभवेनापूर्वस्य विधाने गुण एव विधेयो व्याक
रणांतरवत्। अन्यथास्य सूत्रस्यांताद्यंशेनुवादत्वमेतदंशे विधित्वमिति वैरूप्यापत्तिरिति भावः। इत्नुः
प्रत्ययांतरमिति व्याकरणांतरस्यासत्वात् अपूर्वप्रत्ययस्वरूपकल्पनं अयादेशे चेति। अयादेशवि
धये ढकिलोपइति सूत्रे निमित्तत्वाश्रयणेन पित्व्यसुदंगुपसंख्यानवत् एतेभ्योयथायोगं नि
मित्तत्वाश्रयणमुक्तमुपसंख्यानं कर्त्तव्यमित्यर्थः। आनुमानिकं वचनमेवात्रोपसंख्यानपदेनोच्य
ते सूत्रपाठ एवोपसंख्यानमत्रोच्यत इति केयटोक्तं न युक्तं। कृग्रहणं व्यस्य सूत्रे गुणविधायकेवात
त्पाठस्यावश्यकत्वेनाद्यपक्ष एवाविशिष्यतदुक्तौ बीजाभावात्। मम तु तत्सद्भावे व्याकरणांतरे विहितस
स्यानुमतत्वानुमानमात्रं न तु धर्मिणः कल्पनेति नेतदुक्तिः। उभयं क्रियतइति। इत्नुः प्रत्ययांतरस्य
चानिमित्तत्वबोधनद्वारा एतेभ्यो विधानानुमानरूपसंख्यानं चेत्यर्थः। एवं चास्य सूत्रस्यैकरूपतया
देशानुवादकत्वसिद्धिरिति लाघवमिति भावः। एतेन यच्चेन्नकृत्नुग्रहणमयादेशार्थं क्रियते त्त न्या
दिभ्यश्च कृत्नुरेवतद्धस्यादेवलाघवमिति केयटोक्तमपास्तं। तत्तदिष्टस्वरविशिष्टानामेवांतादीनाम
नुवादात्स्वरविशेषोपि नास्ति। एवं च णादिसूत्रे भुवद्दिष्ट

ल॰श्रा॰शे॰ उ॰ अथ नुः कोधोरित्यात्तिं शब्दस्तु आङ्पूर्वाद्धृतेः क्विनिबोध्यं । अयं ह्रस्वादिरप्युणादिषु साधुः । अंचेः कोवेत्ति ।
९२ अत्र विदित्वन्तुबन्धांतो यम धमो दान्तो पि बाहुलकात् । मरीचिरिति । मिदचोन्त्यात्सूत्रभाष्ये मन्वे । एवं तादृच
इरीमागमश्चेत्युक्तं । कुर्वश्चेङ्डिति । दीर्घविधानसामर्थ्यान्न गुणः । बाहुलकाद्दीर्घगुणयोरभावे कुचोपि ।
समीणः । चट् दीर्घश्चेतिवर्तते । जवालेति । वाद मेत्पर्षः । यंडइति । शंढः प्रा युक्तः ठसेकाइत्यसूत्रे शंठइ
तिप्रतीकमुपादाय ज्ञनिदाच्यइति टप्रसपइतिकैयटः । प्रेत्वरीति । पदागमाइति न्यापेन तु ठविशिष्ट
स्य ग्रहणं ङीप्रो । न च ह शंताद्धि हतत्वेन निषेधापत्तिः । कथं चात्र तुक् अश्छांदसत्वादिति वनोरचेति
सूत्रस्थ भाष्यप्रामाण्यात्सछांदसत्वे बाधनेन न तत एवतदप्रवृत्तेः । वर्णिः सौत्रइति । एवं तस्वर्णरादेशा इत्यु
चितं । किंच वलग्रहणेन इसस्य वलोसिद्धे वर्णरादेशविधानं व्यर्थमिति बोध्यं । वसिवापीति । सूत्रे चा
दिरपि ता निर्दिष्टो बाहुलकादेव तादृपि भवादिसूत्रे आकारे । पातेर्डुमिति । सूतेः सस्यपः ह्रस्वो मसु
नुक्स यइति स्त्रिया जित्तिसूत्रे भाष्ये उक्तं । अगास्तिरिति । अत्र क्ति चत्तौ च इति क्तिजिलन्ते एतत्समाना
योगिस्त्वस्य दोष्णगाइत्स्याय तीति विग्रहे आत्तोनुपसर्गे इति कान्तः । ह्यपोरप्यपसर्गेणापि यकार इ
हित मागस्त्वइत्याद्यस्य । अरुं जिष्मामिति । अरं जिष्मामिति पाठ इति अनिदित्तामितिसूत्रे हरदत्तः । अ रामः
रंजिष्मामिति कैयटः । मिथुने सिः । धातूपपदयोगो मिथुनं । उरुत्र अन्वाइत्यस्यैवोदाहरणमिति याहि
ज्येतिसूत्रे कैयटस्वरसः । दीर्घइति । बाहुलकात्तदभाव पुरूरवा अपि । पावेणेति । तेनाप्सराइत्येक ९२
वचनात्मपि [illegible] ॥ ॐ ॥ इति तृतीयः पादः ॥ ॐ ॥

तुदतिसौत्रात्स्त्यायो रिद्धेतिप्युक्तं वक्तुं। ढिलोपइति। तत्रस्याधातोरातो लोपइत्यनेन। अन्यस्यतुनिपातना
दितिबोध्यं। कम्निमानि। अननैव कंतोःसिद्धावर्जा हृशीतिसूत्रेकमिग्रहणं व्यर्थं। केचिदिति। अत्रा
रुचिःकेयट्माधवादिग्रंथविरोधः। ओमुहुच। गमुश्च हृदः प्रत्ययस्वरेणांतोदात्तः। अतएवगामुतामित्यत्रा
र्थकचिह्नेदे आद्युदात्तपाठस्तुछांदसः। शर्म निष्कद्ध। अतंन्नइति व्याचष्टे। अकार्तीरीति। इणःशीभ्यामित्ये
वसिद्धे पूर्वेतिव्यर्थं मतमाह। अंतोदात्तेति॥ ॐ ॥इति प्रथमः पादः॥ ॐ ॥ कातेःइः।
ऊमागमे नैवसिद्धेऽत्र आदेशविधानं प्रक्रियालाघवाय। रंजेः क्युन्। रजनीतिगौरादित्वान्ङीबितिबोध्यं।
ऌन्तृन्चौ। शास्तिस्तदादिभ्यइतिपाठांतरं। शास्ता। ऌन्स्यपाठेतुह्लसादित्वादपसाधुः॥ ॐ ॥
इतिद्वितीयःपादः॥ ॐ ॥ श्रिवर्धं। ऊकारादेशेनैवसिद्धे पूग्रहणं स्पष्टार्थं। स्थानइति।
अनित्यत्वाज्ज्ञापकस्य अप्रवृत्तेनोपधागुणः। दाकेत्यादौ केणइति ह्रस्वेन। नकपीतिसाहचर्ये णतद्धि
तस्यैवकस्यतत्रग्रहणात्। लोष्टमिति। तच्चसूत्रेलुप्तं लोष्टमिति भाष्ये समलोष्टाश्मकांचनइत्यत्रो
भयोरुपादानं गोवलीवर्दन्यायेन। लोष्टरूपाश्मकांचनयोरित्यर्थः। अश्मपदेनमणयः। लोष्टतुल्य
त्वेनात्यादरणीयेपि आदराभावद्योतनार्थं तदितिवा। वर्त्तिकेति। शकुनौ प्राचांमते वर्त्तिकेत्यर्थ
मुदीचांमते वर्त्तिकेत्येवरूपार्थं वर्त्तका शकुनौ प्राचामिति द्विलप्रकारस्यैव वचनं बोध्यं। अस्थीति।
क्विन्नोनिलंचिंत्यप्रयोजनं। नविद्यत्वेनाद्युदात्तत्वसिद्धेः॥ ॐ ॥इति तृतीयः पादः॥
जूर्णिरिति। वाहुलकादङ्ग्र्तकादितरपि आर्तिर्थिन्। कोटिः। जीविप्राणीसपि। आतेःपी

ल०शा०शे०
उ०
८३

र्थं वचनग्रहणसत्वात्तदाह। भावेइत्यधिकत्येति। अणकर्मे। चात् क्रियायां यामित्याद्या कृष्यते। उपपदसंज्ञानि
योगश्च क्रियते। उपपदत्वं तु प्रत्येकमेव। प्रत्येकं सप्तमी निर्देशात्। इदं स्वत्रंग्बुलाणो बाधमाभूदित्यर्थं। नन्व
वासरूपन्यायेन निर्वाहः। पुनर्ग्बुल् विधानेनैतद्विषये न्यायाप्रवृत्तेरेतण्वैतद्विषयत्वं ज्ञाप्यते न। कर्त्तेत्यस्मि
न्वासरूपन्यायेन ण्वुल् न प्राप्तं तदाह। ण्वुलोपवाद इति। एवं च प्रतिप्रसवविधिरयं। पुनरनुवादे न ज्ञापकासिद्ध
वासरूप निषेधाप्रवृत्तिमात्रं। अत एवाप्तुर्विध्यपेक्षया लाघवं। नन्वेवं केवलदाय इत्यादावण्णनस्यादर्शनेन
ण्वुलाप्राप्त बाधस्य प्रतिप्रसवेयिके न बाधस्य दुर्वारत्वादत आह। परत्वादिति। अकृत्यास्य तु नर्णविधाय
कत्वेनाण्डल्कृष्यत्वात्कस्यापि बाध इत्यर्थः। वचनग्रहणसामर्थ्याच्चाप्यत्रेति भाष्ये स्पष्टं। पदरुज। णजि
सतः घाकुधत्वधिक्रियते। अपकर्त्तरि। सारोबलमिति। भाष्ये तु बलेरवादेर सार इत्युदाहृतं। सिद्धाव
स्येति। अतएवास्त्रियामिति विशेषणं। इणंतस्यैवेति। अत्र घञीत्यनुवर्त्य उपसर्गस्य घञीत्येव सिद्धे नि
यमोयमिति भावः। प्राप्तिकमिति। स्पष्टं चेदं भाष्ये। इङश्च। अयमपि न कलाश्रयस्यैव बाधको न त्विवोवा
ख्यानात्। अभिनिस इति संधातग्रहणं व्याख्यानात्तदाह। अस्मादिति। उन्नय इत्यस्य पर्यायपर्यायेत्येदोत्ति। नि
रभ्योः। अत्रोपसर्गाभ्यां धालोर्यथासरूपं। धान्येति। धान्यविषयकविद्धेपार्थ्यप्रतिपादकादित्यर्थः। यज्ञे समि।
यज्ञविषयकेर्थे वर्त्तमानात्स्तुव इत्यर्थः। सामिमुष्टौ। मुष्टिविषयकार्थे वृत्तेर्ग्रहे रित्यर्थः। परिन्योः। द्यूताभ्रेष
विषयकार्थी द्धातोरित्यर्थः। पदार्थानामनपचार गेयथाप्राप्तस्य च करणमभ्रेषः। राजोपशाय इति। रामः
राजसमीपशयनस्य पर्याय इत्यर्थः। हस्तादाने च। निश्चेरयमेव वक्ष्यमाणयः फूर्व विप्रतिषेधे नेति भा ८३
ष्ये। काशीनिकाय इति। का[illegible] संघर्षे। जोयाव[illegible] कायेभावेघञ्। कर्मव्यतिहारे। णच्स्त्र

९३

समानेस्यइति। इणीति ङिद्धितियलोपइतिचानुवर्त्तते। सचोदात्तइइस्यसमानस्यसादेशङदात्तइस्यर्थः।
सचसमासोन्तरमितितत्स्वरेणाभवृस्या। समानस्येतियोगविभागेसहशब्दपर्यायसहशब्देनवासमानेसा
देशसिद्धेरस्यानुवादत्वात्। धीङोह्र। ङितस्वनेरित्यतउदात्तग्रहणमनुवर्त्तते। तच्चधीङोविशेषणं।
तेनाद्युदात्तोयं। ह्रस्वविधिसामर्थ्यान्जुणोन। लोपइति। अलोन्त्यस्य॥ ॐ ॥इतिपंचमःपादः॥
ॐ ॥उणादयो। अत्रोणादिशब्देनव्याकरणान्तरप्रसिद्धाःपंचपाद्युक्ताएवनाष्टाध्यायीस्या
स्तथासतिकृसलुटइत्यत्रशेगाख्यापामित्यत्रबहुलग्रहणवैयर्थ्यापत्तेः। एवंचात्रनिर्दिष्टत्वात्ताभ्यामन्य
त्रैस्त्रापिपंचपाद्युक्तानामेवग्रहणं। बहुलग्रहणप्रपंचभूतानिसूत्राणिव्याचष्टे। भूतेपीत्यादि। तुमुन्ण्वुलौ।
भविष्यतीत्यनुवर्त्तते। उपपदमितिमहासंज्ञयाक्रियापदंतच्चकर्मक्रियाचात्रतदर्थोपस्थाप्यैव। तेनभो
क्तुंपाकइतिन। उपपदमितिङितिसूत्रस्थभाष्यस्वरसादितिनिरूपितं। पुनर्विलिति। अकेनोरित्यत्रभविष्यदधिका
रविहितस्याकस्ययोगइतिव्याख्यानेनफलं। नचववर्षशतस्यपूरकइत्यादौण्वुलन्तचादितिण्वुलिपदांतरसंबंधात्
भविष्यत्वप्रतीतावपिषष्ठीसिद्धिःफलं। तथाएतत्कर्मकयाजनः कर्त्ताऽस्यकेण्यजतोलप्स्यतेस्ययाजकाइ
त्यादौषष्ठीसिद्धिरपिफलमितिवाच्यं। शब्दशक्तिस्वाभाव्येनक्रियानुपपदकाकांतकर्तृप्रतिपादकतयापदांत
रसंबंधादिनाभविष्यत्वप्रतीतावप्यकस्यभविष्यदर्थकत्वाभावेनतत्रनिषेधाप्राप्तेरितिभावः। ल्युट्तुसामर्थ्याभि
वस्येवेतिबोध्यं। अनंतरत्वादिति। अत्रव्याख्यानमेवशरणं। कालःपचतीति। अत्रधात्वर्थमात्रंविवक्षितंनवर्त्त
मानत्वादिस्म्ह तभविष्यत्वाकस्यापिविवक्षितत्वादितिप्राप्तिरितिभावः। भाववचनाइति। वाहुलकात्कर्मणिल्युट।
भावाधिकारविहिताश्चभाववचनाः। नचभावइत्येतावतैवभावेयेविहितास्तेततोन्यत्रापीत्यर्थेनेष्टसिद्धि
रितिवाच्यं। याप्यः प्रकृति ... ... विहिता ... ... वदिशेषणभवं ... तिस

ल०श०शे० उ० २४

भावादाविति। तत्र यथाभिधानं व्यवस्था। अयमनेकाज्मोनेसाद्यंतवत्सूत्रस्थकैयटस्वरसः। स्त्रियामित्य
धिकारः क्तल्युट् इति यावत्। अजपौ विति। अजब्भ्यां स्त्री स्त्रीखलनाइति वार्त्तिकात्क्तेरिति भावः। प्र
सृतिरि ति। भाष्येनैतत्त्वदृष्ट। इष्यत इति। बाहुलकादिति भावः। ज्ञापकादिति। तेन बाहुलकादङपीति भावः।
वर्त्तत इति। मंत्रे वृषेषेति सूत्रादिति भावः। भावादाविति। कपद्विधाववधिकरणे चेति वार्त्तिकात्। तत्र चेन क
रणसंग्रहः। ऊनोपं क्यब्भावे एवेति। ऊनोसंज्ञायामिति सूत्रभाष्यस्वरसः। परिचर्येत्यादि भावे निपात्यत्ते। यक
त्रुसिद्ध एव। अकर्त्तरि कारके भिधानसत्त्वेन तत्र य गपि निपातः। ऊजयेति। णिनिमित्ताजंतत्वादणवध्य
भावो कस्मात्वे तिदीर्घाभावश्चानिपातनादितिबोध्यं। अदंतरोरिति। तत्रऋदङ्विधावेव। अंतःशब्दस्य ङ्कि
विधिणत्वेध्विति भाष्यस्पष्टं। तेनांतर्द्धितिद्धि रंतर्णयतीत्यादि सिद्धिः। एवं चोत्तरदेशे जयनं वेति सूत्रद्वयं
नकर्त्तव्यं। देशे प्रतिषेधः दुर्ग्नादित्वात्सिद्ध इति। अंतरपरिग्रह इति सूत्रे कैयटः। आर्द्धसूत्रा श्रद्धेति निर्दे
शात्सिद्धं। राद्विफः। रादिति निर्देशात्स्वदेशस्य सामान्याभावोपि। मत्वर्थीय इति मतुशब्दे नतदर्थी लक्ष्य
तेततो बहुव्रीहिः। स्वार्थेछ इति बोध्यः। शरीरसुखमिति। अर्थात्स्य शयमानस्य कर्त्तुः शरीरस्वास्थ्यजनकंसु
खमित्यर्थः। कर्मणि किं। तूलकायाऽउत्थानं सुखं स्पर्शादिति किं। अग्निकुंडस्योपासनं सुखं। शरीरे किं। ति०२
पुत्रस्य परिष्वजनं सुखं मानसी प्रीतिरत्र। वायौ इदं सूत्रमजेयौ परत्वाद्वाइस्यादेशो वायुरित्येवं भाष्ये व्याख्या
तं। छादेर्घे। अत्रोपधायाइत्यनुवर्त्तते णाविति वा छादेरिति णिप्राग्भागात्तत्कारणमाणं तुनेकारेण। छपर
णावगसस्थादङ्उपधाया ह्रस्वइस्यर्थः। एतेन रोरवे ह्रस्वः स्यात्तत्सामर्थ्याच्छ्रुतिलोपो नस्यादित्यपास्तं। अवे राम: २४
तृस्त्रोः करणाधिकरणयोरित्यनुवर्त्तते [illegible] हलश्च। अत्रापि प्रायेणेति वर्त्तते।

कारेण च स्त्रियामित्यादौ विशेषणार्थः। आक्रोशे वन्योः। अनंतरोपी नुणा न संबध्यते। अस्वरितत्वात्। ग
णेरा। समुदायेनाछादनेनाप्येइत्यर्थः। आछेति किं प्रवरा गोः। कल्पादि   भगणजने तिवार्त्तिकं। कल्पोपेमिंत्रेः।
णजापेतानामितित्वनार्थं। अचश्चकारस्याचेतिसूत्रे विशेषणार्थः। निश्चय इति। अप्रविधानसामर्थ्येन
थाथादिस्वरोत्र न प्रवर्त्तते। एवं चोत्तरपदप्रकृतिस्वरेण मध्योदात्तमेतत्। एतेनान्चैव सिद्धं थाथघञ्
चे ५ त्तस्य प्रवक्त्यास्वरे विशेषाभावात्। नन्च हस्तादाने रितिघञो बाधनार्थं मस्त्येयेऽस्मानिष्ठेरिति। परास्तं। घनर्थे
क इति। स्थास्नापाध्याहनियुधिपुध्यर्थमिसुदाहरणमात्रं बोध्यं। प्रस्थाविघ्नयोरधिकरणे कः। प्रतिष्ठंते स्मिन्
इतिवि धान्यानीति प्रस्थाः। विघ्नंति तस्मिन्मनांसि इति भाष्योक्तेः। वधजपो। अनुपसर्गे इससोपसर्गे नेत्यर्थस्त
घ्न ७ दाह। वधइति। उपजापो मंत्रभेदः। अनुपसर्गे चेति। उपसर्गाभावे चेत्यर्थः। तदाह। करण इति। मदोनुप। उ
पसर्गं भिन्ने उपपदे इत्यर्थः। लह इत्यत्राप्प्रत्ययो लत्वं च निपात्यते। हनश्च वधः। चो वध इत्यनंतरं प्र
त्ययसमुच्चायको योज्यो व्याख्यानात्। अत्र वधादेशोंतोदात्तो निपात्यते इत्युदात्तनिवृत्तिस्वरेण प्रत्यय
उदात्तः। स्वतंत्र वधे घञि घे केन सिद्धे नुपसर्गादिति विशेषणवक्तुमिदं। वस्तुतो विधिः स्वतंत्रो नास्त्वेवेत्यु
क्तं। यत्तु माधवेन दध्येर्घञा सिद्धे तोदात्तार्थमिति। तन्न। एरजित्युत्तरं वध इत्येव सिद्धे हन इत्यस्य वैय
र्थ्यापत्तेः। घनांत घनिप्रघणप्रघाणोत्घनापघनेति निपातनं। हंतेरदंतापते आदेशाः। अप
प्रत्ययश्च। तिपस्तृह्यम पिस्तं वेकश्चेतिसूत्रे भाष्ये स्पष्टं। अंत्येतो लोपे कृते पडदात्तनिवृत्तिस्वरो दात्तः। ण
आद्युदकिंत इत्यंतोदात्तत्वं बोध्यं। अंत्येहन इत्यस्य सर्वत्र संबंधः। अभ्रघनेभ्रसंबंधो घन इति विग्रहः।
कर्मण्युपधिः। व्याख्या [illegible] पदमधिकरणमर्थः। अधिकरणग्रहणमर्थांतरनिरासार्थं॥

ल॰शा॰शे॰ उ॰ ८५

वकाल इति। तद्धि शिष्टेर्वर्त्तमानात्क्वातो रित्यर्थः अत एव समानकर्तृकयोः पूर्वकाले इति क्रियाप्रधानो
निर्देश इति भाष्ये उक्तं। द्वित्वमिति। पूर्वत्वस्य समानकर्तृकत्वस्य च भेदघटितत्वेनानेकक्रियाभाने पि सौत्रो
द्विवचननिर्देश इति भावः। पूर्वकालत्वं च व्यवहितमपि। व्यवधानस्य च तात्पर्यवशेन व्यवस्था। अत एव भु
क्त्वा व्रजति अभुक्त्वा व्रजिष्यतीत्याद्युपपत्तिः। पूर्वविप्रतिषेधेनेति। पुरस्तात्प्रतिषेधकांडारंभसामर्थ्या
दित्यर्थः। न क्त्वा सेट्। अनेन किं कार्यं निषिध्यते किल निषेधे हि कस्य श्रवणं स्यात्। क्त्वेति किं। निगृहीतिः
जल्पादाविति। अनुनासिकस्य क्वीत्यतो झलीति वर्त्तते। जल्पादावीति। अनिदितामित्यतः क्ङितीत्यनुवर्त्य क्कि वि दे
ति क्वीति मार्गे यमित्यर्थः। सेट्क्त्वा च न किदिति भावः। समासेन। अनञिति पर्युदासः तेन नञ्सदृशा
न्यपूर्वपदके प्रसासत्या क्त्वा तोत्तरपदक इत्यर्थः। तेन स्नात्वा कालक इत्यादौ न दोषः। अनञ् इत्येव स
क्षे पूर्वग्रहणं स्पष्टार्थं। अधीत्येति। यद्यपि पदांतपदाद्योरेकादेशः सिद्धोत्र चोत्तरखंडे सुबुत्पत्तेः पू
र्वमेव समासस्तथापि तत्र पदाशब्देनार्थवत उपलक्षणान्न दोषः। गतिकारकेत्यस्यानित्यत्वात्सुबंतेन वा स
मासः वाल्यपीत्यस्य स्थाने ल्यप् च वा म इति वार्त्तिकन्यासः। नांतानिटामिति। प्रयोगाभिप्रायेण बहुवचनं।
दीप१ आभीक्ष्ण्ये यद्यपि वासरूपन्यायेन क्त्वा सिद्धस्तथापि विभाषाग्रे इति सूत्रेणोभयोर्विधानाय चकारः त
त्र सूत्रे साधनांतरजन्यस्वजातीयक्रियापेक्षया पौर्वकाल्यरूपसाध[illegible] पौर्वकाल्यं विभाषये समानादि सूत्रेण
सेन३ क्त्वा न्यायेन दुर्लभत्वात्। नाप्यनेनाभीक्ष्ण्ये पूर्वप्रतिषेधेनासौ वेक्ष्यत्वेनानाभीक्ष्ण्ये पि स्यादेव तत्सत्वे। द्वित्वमिति।
नित्यवीप्सयोरित्यनेन। यद्यपि आभीक्ष्ण्यं णमुलादिनाद्योतितं। तथाप्यर्थात्तदर्थे पि तद्द्वित्वरहितयोर्नतत्र रामः
द्योतने सामर्थ्यमिति भावः। नाकांदाते इति। यद्यपि [illegible] क्रियापा[illegible] ना कां दास्तितत्पाप्या ८५

दपो२

अवहारादयस्त्रयोप्यधिकरणसाधनाः। उदकोनु। अनु दकविषयकार्यप्रतिपादकांचेरुदंकइतिनिपात्य
तइत्यर्थः। घृतोदंकइति। वासस्तस्मान्पायेनघृतोदंचनोपीतिकश्चित्। गोदोहनप्रसादनयोर्वा हुलकात्
घञोनेतिवोध्यं। आनायइति। निपात्यतेजालंचेद्वाच्यमित्यर्थः। जालशब्दस्तुजलघातनइतिधा तोर्ज्वलि
तीतिणः। ततः। भागः पदमिति क्वचित्प्रयोगः। ईषतदुःरिवलमुत्तरार्थेलकारः स्वरार्थः। खलचोरिति। पचाद्यच्‌एर
च्णप्यते। नसुदुर्भ्यां। तृतीयापंचमीवेयं। आद्यप्रलुदह रति। सुप्रलभइति। द्वितीयेआह। अतिदुर्लभइति।
अत्रकेवलशब्देनसूत्रोपस्थितातिरिक्तसजातीयमुपसर्गांतरंव्यावर्त्यते। नकर्मप्रवचनीयइ तरः शब्दो
यतध्वनयेनाह। यदास्वतीति। सूत्रोपात्ता ति रिक्तेति विशेषणात्सुदुर्लभमित्यस्यासिद्धिरितिकेयटः। सुदुरो
पसर्गत्वप्रतिषेधस्तुकेवलसुदुर्विषयएवातिसुदुर्लभमित्यत्रैवभाष्यप्रयोगात्। आतोयुच्। ईषदादयो
नुवर्तं तेनतुकर्तृकर्मणोरिति। दुष्यानेइदुपधस्येतिषः। षात्पदा। कसचइतिभावकरणयोरितिचप्र
प्तनिषिध्यते। पदैं तइति। अत्राचांतग्रहणमेवमानं। क्तिचक्तौच। क्तिचावाधामाभूदितिपुनःक्तविधिः। न
क्तिचि। अनुदात्तपदे शवनतीत्यादिनुवर्तते। दीर्घेति। अनुनासिकस्येतिप्राप्तः। वनितनोत्ति तुनेति
नेह। सनः क्तिचि। अस्यविकल्पत्वाद्योगग्रहणफलाभावादाह। सनोतेरिति। सनइत्येदकुमुक्तं। अलंख
छंदसिभावलक्षणइतिनिवृत्तं। अव्ययकृत्वादेसलंभूतोभावः कार्यः पदेत्सुडादौतुसलंभूतइत्यन्यत्र। अ
लंकारइति। भावेघञ्। मे ङः प्रणिदानेइत्युत्तयामतीहारार्थत्सत्तसेवक्वातोलस्यसूत्रनिर्दे शः। समानक
र्तृकयोरितिनेनसिद्धिमाशंक्याह। पूर्वेति। पूर्वत्वासौपाचित्वापश्चादधमयतेवस्त्रादिपरिवर्तयतीत्य
र्थो विवक्षितइतिभावः। परावर। अवरशब्दोत्रपूर्वकत्ववाची। समानक। कप्रत्ययपदं वा बहुव्रीहिः। पू

स्वपे १

ल॰ शे॰ टी॰ ७॰ ९९ स्वांगत। तस्मिन्न्सयांते स्वांगेऽउपपदे इत्यर्थः। तस्य स्वपे इति कर्मधारयः। नाधार्थ। यथासंख्यमत्र नेष्यते।
आनुलोम्यमानुकूल्यं तच्च परचित्तानुसरणमिति सर्वं सुसिद्धिः। इत्युपाध्यायोपनामकशिवभट्ट
सुतसतीगर्भजेन नागोजीभट्टकृते लघुशब्देन्दुशेखरे सिद्धांतकौमुदीव्याख्याने कृदंतं विस्तर
स्तु बृहच्छब्देन्दुशेखरे द्रष्टव्यः॥ ॐ ॥ ॥ श्री ॥ श्री ॥ श्री श्री

रामः ९९

स्यातोपात्तक्रियायाआकांक्षानिषेधविषयः नाकांक्षितश्चेदितियुक्तःपाठः।यद्येलङादयइति।कर्त्रोर्द्विविव
दापदेइत्यर्थः।भावेहेतौतदाह।अग्रेभुंक्तइति।अत्रैवार्थे विभाषाग्रहणंतात्पर्यग्राहकं।एतद्विषयेकर्त्री
दिदिवदापिपूर्वसूत्रेविषयेतुनसमानाभावादितिदिक्।चोरंमाक्रोशतीति।चोरशब्दमुच्चार्येत्यर्थः।नचा
त्रानुकरणंचानितीतिनिगतत्वात्प्रत्यययोःसत्वानुमनापत्तिः।अरुर्द्विषदितिसूत्रेखिदंतप्रत्ययस्येत्यनु
कर्तेरितिवाच्यं।खित्करणसामर्थ्यात्तत्सिद्धेः यद्वाक्रोसाधुत्वार्थः।चोरंमा क्रोशतेइत्येवबोधः।यथा
तप्ययोः।अस्वरूपयाप्रतिवचने इतिविग्रहः।वर्षप्रमाणे।वर्षोक्लिष्टिः।गोष्पदप्रकरणेह।हिंसा र्था
मित्याद नांच समानेतिसिद्धे।हिंसार्थं नित्यवचनंहिंसायांनित्यसमासार्थंच तेनप्रत्ययेतुतृतीयाप्रभृती
चेटे नीतिविकल्पेनसमासात्तदाह।यथाविधीति।हस्तार्थेइति।व्याख्यानादर्थग्रहणं।अधिकरणेवं।अत्रसंज्ञा
योकृष्यतेतेनग्रामेवबद्धइत्यर्थेग्रामवधंवद्धइतिन।कषादिषुसर्वत्रेति।सचाविशेषात्कृदंतस्तिङंतश्चे
श१ तिबोध्यं।प्राप्येति।एवंहिनामत्वरणपदावयवकमुखद्वाले नाद्यकल्पेवधावतीत्यर्थः।येनविनेति।एवंच
येनविनाजीवनंतद्ध्रुवमितिफलितं।यद्यपीति।क्त्वानिवृत्तिस्तुनेतिभावः।उपपदेति।द्वितीयांतत्वे
त्वादिःतेनपाक्षिकोयं पदसमासासिद्धिरितिभावः।गेहस्येति।व्याप्यमानतयाद्रव्यस्याद्वित्वेसमासेसमास्यमान
त्वेनणमुलंतस्येतिभावः।केवलेनणमुलासमासाभावे द्वित्वंविनातयोर्वक्तुमशक्यत्वमित्यत्तात्पर्यं।अ
स्यतितृषोः।अनयोःकिं।द्व्यहमुपोष्यभुंक्ते।क्रियांतरेतिकिं।अहरत्यस्यपूनागतःनगतिर्वा वधीयते। पञ्चन्
कालेषुकिं।योजनमत्यस्यगाःपाययति।नाम्न्यादि।नामशब्देउपपदेआङःपूर्वाद्दिशेर्ग्रहेश्चणमुलि तः ए२
त्यर्थः।तिर्यच्यीति।सौत्रोनिर्देशइतिभाष्यं।तिर्यक्कल्पेत्यर्थसमुदायोपमानो तदाह।समाप्यणतइति।